
# ಶ್ರೀಮದಾನನ್ದತೀರ್ಥಭಗವತ್ಪಾದಾಚಾರ್ಯಃ



Tracking:

| Sr | Date | Remarks | By |
|---|---|---|---|
| 1 | 16/08/2012 | **Typing Started on** | **H K Srinivasa Rao** |
| 2 | 16/08/2012 | **Typing Ended on** | **H K Srinivasa Rao** |
| 3 | 16/08/2012 | **I Proof Reading & Correction** | **B S Pavan & H K Srinivasa Rao** |
| 4 | 18/08/2013 | **Published** | **H K Srinivasa Rao** |
| | | | |

## ॥ ಶ್ರೀ ಹಯವದನ ರಂಗವಿಠ್ಠಲ ಗೋಪೀನಾಥೋ ವಿಜಯತೇ॥

*Blessed by Lord and with His divine grace, we are pleased to publish this Magnanimous Work of sri Acharya Madhwa. It is a humble effort to make available this Great work to sadhakas who are interested in the noble path of propagating Acharya Madhwa's Philosophy.*

*With great humility, we solicit the readers to bring to our notice any inadvertant typographical mistakes that could have crept in, despite great care. We would be pleased to incorporate such corrections in the next versions. Users can contact us, for editable version, to facilitate any value additions.*

*Contact: H K SRINIVASA RAO, N0 26, 2ND FLOOR, 15TH CROSS, NEAR VIDHYAPEETA CIRCLE, ASHOKANAGAR, BANGALORE 560050. PH NO. 26615951, 9901971176, 8095551774, skype Id: SRKARC6070*

*Email :* **srkarc@gmail.com**

## ಕೃತಜ್ಞತೆಗಳು



ಜನ್ಮಾಂತರದ ಸುಕೃತದ ಫಲವಾಗಿ ಮಧ್ವಮತದಲ್ಲಿ ಜನಿಸಲು, ಪ್ರೇಮಮೂರ್ತಿಗಳಾಗಿ ನನ್ನ ಅಸ್ತಿತ್ವಕ್ಕೆ ಕಾರಣರಾದ, ಈ ಸಾಧನೆಗೆ ಅವಕಾಶಮಾಡಿದ, ನನ್ನ ಪೂಜ್ಯ ಮಾತಾ ಪಿತೃಗಳಾದ, ದಿವಂಗತರಾದ ಲಲಿತಮ್ಮ ಮತ್ತು ಕೃಷ್ಣರಾವ್ ಹೆಚ್ ಆರ್ ಅವರ ಸವಿ ನೆನಪಿನಲ್ಲಿ ಈ "ಸರ್ವಮೂಲ ಯಜ್ಞ"

''ಮಾತೃದೇವೋ ಭವ-ಪಿತೃದೇವೋಭವ-ಆಚಾರ್ಯದೇವೋಭವ''

ಗ್ರಂಥ ಋಣ:ಆಚಾರ್ಯ ಪ್ರಭಞ್ಜನರಿಂದ ಪ್ರಕಾಶಿತವಾದ ಸರ್ವಮೂಲ ಗ್ರಂಥಗಳು

## ॥ जयन्तीकल्पः ॥

रोहिण्यामर्धरात्रे तु यदा कालाष्टमी भवेत् ।

जयन्ती नाम सा प्रोक्ता सर्वपापप्रणाशनी ॥ 01 ॥

यस्यां जातो हरिः साक्षान्निशीथे भगवानजः ।

तस्मात् तद्दिनमत्यन्तं पुण्यं पापहरं स्मृतम् ॥ 02 ॥

तस्मात् सर्वैरुपोष्या सा जयन्ती नाम वै सदा ।

द्विजातिभिर्विशेषेण तद्भक्तैश्च विशेषतः ॥ 03 ॥

यो भुङ्क्ते तद्दिने मोहात् पूयशोणितमत्ति सः ।

तस्मादुपवसेत् पुण्यं तद्दिनं श्रद्धयान्वितः ॥ 04 ॥

कृत्वा शौचं यथान्यायं स्नानं कुर्यादतन्द्रितः ।

प्रभातकाले मेधावी योगायेति यथाविधि ॥ 05 ॥

नित्याह्निकं प्रकुर्वीत भगवन्तमनुस्मरन् ।

योगाय योगपतये योगेश्वराय

योगसम्भवाय श्रीगोविन्दाय नमो नमः ॥ 06 ॥

मध्याह्नकाले च पुनः सायङ्काले त्वतन्द्रितः ।

स्नायीत पूर्वमन्त्रेण वासुदेवमनुस्मरन् ॥ 07 ॥

ततः पूजां प्रकुर्वीत विधिवत् सुसमाहितः ।
यज्ञायेति च मन्त्रेण श्रद्धाभक्तियुतः पुमान् ॥ 08 ॥

कृष्णं च बलभद्रं च वसुदेवं च देवकीम् ।
नन्दगोपं यशोदां च सुभद्रां तत्र पूजयेत् ।
अर्घ्यं दत्वा समभ्यर्च्याभ्युदिते शशिमण्डले ॥ 09 ॥


जातः कंसवधार्थाय भूभारोत्तारणाय च ।
कौरवाणां विनाशाय दैत्यानां निधनाय च ॥ 10 ॥

पाण्डवानां हितार्थाय धर्मसंस्थापनाय च ।
गृहाणार्घ्यं मया दत्तं देवक्या सहितो हरे ॥ 11 ॥

क्षीरोदार्णव सम्भूत अत्रिनेत्र समुद्भव ।
गृहाणार्घ्यं मया दत्तं रोहिण्या सहितः शशिन् ॥ 12 ॥

दत्वाऽर्घ्यं मनुनानेन ह्युपस्थाय विधुं बुधः ।
शशिने चन्द्रदेवाय सोमदेवाय चेन्दवे ॥ 13 ॥

मृगिणे शशिबिम्बाय लोकदीपाय दीपिने ।
रोहिणीसक्तचित्ताय तारकापतये नमः ॥ 14 ॥




उपसंहृत्य तत् सर्वं ब्रह्मचारी जितेन्द्रियः ।

विश्वायेति च मन्त्रेण ततः स्वापं समाचरेत् ॥ 15 ॥

ततो नित्याह्निकं कृत्वा शक्तितो दीयतां धनम् ।

सर्वायेति च मन्त्रेण ततः पारणमाचरेत् ।

धर्मायेति ततः स्वस्थो मुच्यते सर्वकिल्बिषैः ॥ 16 ॥

**॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्य विरचितः जयन्तीकल्पः ॥**

**॥ मुख्यप्राणवशे सर्वं स विष्णोर्वशगः सदा ॥**

**॥ प्रीणयामो वासुदेवं देवतामण्डलाखण्डमण्डानम् ॥**